# संस्कृत श्लोक

(1) दर्शने स्पर्शणे वापि श्रवणे भाषणेऽपि वा ।
यत्र द्रवत्यन्तरङ्गं स स्नेह इति कथ्यते ॥

(2) यथा चतुर्भिः कनकं परीक्ष्यते निघर्षणच्छेदनतापताडनैः ।
तथा चतुर्भिः पुरुषः परीक्ष्यते त्यागेन शीलेन गुणेन कर्मणा ॥

(3) विद्या ददाति विनयं विनयाद्याति पात्रताम् ।
पात्रत्वाद्धनमाप्नोति धनाद्धर्मं ततः सुखम् ॥

(4) सत्यम् एव ईश्वरो लोके सत्यम् पद्मा समाश्रिता ।
सत्य मूलानि सर्वाणि सत्यान् न आस्ति परम् पदम् ॥

(5) न चौर हार्यम् न च राज हार्यम् ।
न भ्रात्र भाज्यम् न च भारकारी ॥
व्यये कृते वर्धते नित्यं ।
विद्या धनं सर्वे धनं प्रधानम् ॥

(6) नहि कश्चित् विजानाति किं कस्य भविष्यति ।
अतः श्वः करणीयानि कुर्याद्यैव बुद्धिमान ॥

(7) दिवसेनैव तत्कुर्यात् येन रात्रौ सुखं वसेत् ।
यावज्जीवं च तत्कुर्याद् येन प्रेत्य सुखं वसेत् ॥

Scanned by CamScanner